Sudarshan Research Journal
Volume – 1, Issue - 8, December-2023
ISSN No: 2583-8792
Impact Factor: 3.179 (SJIF)

# कालिदासरूपकेषु औचित्यदर्शनम्

**रमनदीप**
**सहायकप्राध्यापिका (संस्कृतविभागः) चौधरी देवीलाल विश्वविद्यालयः, सिरसा**

**संस्कृतसाहित्यस्य इतिहासः यथा विपुलज्ञानभण्डारेण गौरवान्वितो अस्ति तथैव साहित्यिकसमीक्षायाः इतिहासोऽपि समृद्धः गौरवशाली च वर्तते। साहित्यशास्त्रे रसध्वनिवक्रोक्तिरीत्यलङ्कारौचित्यसंप्रदायानां विशदालोचनायां साहित्यिकसमीक्षाया अभावदर्शनं पक्षपातपूर्णदृष्टिपातमेव भविष्यति। यतः साहित्यिकसमीक्षायाः अप्येकः विकासमानः प्रवहमानश्च क्रमोऽस्ति यस्मिन् समीक्षकानां दृष्ट्या आचार्यभरतप्रभृतेः प्रारभ्य पण्डितराजजगन्नाथपर्यन्तं कालं तथा च समीक्ष्यतत्वानां दृष्ट्या रससम्प्रदायादारभ्य औचित्यसिद्धान्तपर्यन्तं कालम् उल्लेखनीयमस्ति। संस्कृतसाहित्यसमीक्षायाः समारम्भः वैचित्र्यपूर्णोक्तेः चमत्कृतेः तथा च अलंकाराणां गवेषणया भवति।**

समीक्षाशास्त्रस्य प्रथमसोपानानन्तरं द्वितीयसोपानरूपेण वामनस्य रीतिवादः आगच्छति। **रीतिरात्मा काव्यस्य[1]। विशिष्टपदरचना रीतिः[2]।** तृतीये सत्रे ध्वनिसिद्धान्तस्य नाम उल्लिखितोऽस्ति। यद्यपि ध्वनेः व्यञ्जनायाः प्रयोगः पूर्वमपि भामहस्य काव्यालंकारे जातं तथापि काव्ये व्याप्यव्यापकसम्बन्धरूपे प्रतिष्ठापनायाः श्रेयः आनन्दवर्धनमेव गच्छति । स्वयमानन्दवर्धनाचार्येण इमं ध्वनिमार्गं प्रसिद्धप्रस्थानव्यतिरेकी अनुन्मीलित्पूर्वं[3] चोक्तम्। ध्वनेः विराट् परिधौ गुणालंकाररीतिरसादि काव्यतत्वानां अन्तर्भूतिः उचितरूपेण भवति। तस्यां काव्यस्य अन्यैः तत्वैः सह अवयववावयवी सम्बन्धोऽस्ति।

अग्रे रसनिष्पत्तिप्रसंगे भुक्तिवादस्य प्रवर्तकाचार्यभट्टनायकस्य प्रखरपाण्डित्यस्य दर्शनं भवति। भट्टनायकः रसं भोग्यं कथयन्ति, तेषामनुसारं रसविभावयोः मध्ये भोज्यभोजकसम्बन्धोऽस्ति। अनन्तरं ध्वनिव्यञ्जनयोः स्थाने वक्रोक्तेः प्रतिष्ठां कृत्वा आचार्यः कुन्तकः स्वकीयां सूक्ष्मतत्वान्वेषिण्याः बुद्धेः परिचयं ददाति। साहित्यसमीक्षायाः अन्तिमे सोपाने औचित्यसिद्धान्तस्य पदार्पणं भवति। औचित्यं काव्यसिद्धान्तरूपे प्रतिष्ठादानस्य श्रेयः आचार्यक्षेमेन्द्रमेव गच्छति। परमाचार्यक्षेमेन्द्रात् पूर्वमपि आचार्याः औचित्यरसेन परिचिताः आसन्। भरतमुनि-आनन्दवर्धन-अभिनवगुप्तादिभिरपि काव्यविधाने औचित्यस्य महत्त्वं स्पष्टतया स्वीकृतमस्ति। भरतमुनिः औचित्यशब्दस्य साक्षात्प्रयोगं तु न कुर्वन्ति परं विभिन्ननाट्याङ्गेषु परस्परानुकूलतायाः[4] अनुरूपतायाः च व्यावहारिकताया उपरि बलं प्रददाति। भरतस्यानुरूपता अनुकूलता एवौचित्यमस्ति। आचार्यभरतमुनेः पश्चात् अलंकारवादी आचार्यः भामहः स्वग्रन्थे काव्यालङ्कारे सांकेतिकरूपेण विषयेऽस्मिन् उल्लिखति। ते औचित्यपदस्य प्रयोगं तु न कुर्वन्ति अपितु

---

[1]काव्यालङ्कारसूत्राणि 1.2.6
[2]का० सू० 1.2.7
[3]ध्वन्यालोकः 1.1
[4]नाट्यशास्त्रम् 14.68

दोषदर्शने औचित्यस्य अप्रत्यक्षकथनं कुर्वन्ति, अत्र **सन्निवेशविशेषत्वम्** औचित्यस्यैव संकेतकोऽस्ति । दण्डिनः काव्यादर्शे औचित्यस्य संकेतः दोषाणां परिहारविवेचनावसरे अप्रत्यक्षरूपेण मिलति।

औचित्यशब्दस्य प्रथमतया उल्लेखः यशोवर्मणा कृतमस्ति। भरतमुनेः आनन्दवर्धनाचार्यानन्तरं रुद्रटः प्रथमालंकारिकोऽस्ति येन औचित्यस्य प्रयोगः स्वग्रन्थे काव्यालंकारे कृतमस्ति तत्र ते न केवलं दोषौचित्यार्थात् औचित्यपूर्णविधानेन दोषत्वपरिहारत्वमेव प्रकाशयन्ति अपि तु रसौचित्य-अलंकारौचित्य-वृत्यौचित्यादि भिन्न-भिन्नकाव्याङ्गेषु अपि विचारं कुर्वन्ति। आनन्दवर्धनाचार्यः स्वकीयविवेकोत्कर्षस्य परिचयं प्रयच्छन् रस-ध्वनि-औचित्यसम्बन्धी आत्मवादी सिद्धान्तानां प्रवर्तनं प्रतिष्ठापनं निरूपणं च कृतवान् । ध्वनिसिद्धान्तस्य प्रवर्तनेन ते रससिद्धान्तस्य विस्तारं कृतवन्तः तथा च रसध्वनिं प्रतिष्ठापितवन्तः, सार्धमेव औचित्यस्य निरूपणं कृत्वा रसस्य तथा काव्यस्य विभिन्नाङ्गानां रसानुकूलसंयोजनायाः आवश्यकता अपरिहार्यता यथास्थानविन्यासस्य महत्त्वं च बोधितवन्तः। आचार्यानन्दवर्धनेन स्पष्टया बोधितं -

**अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ,**

**औचित्योपनिबन्धस्तु रसस्योपनिषत्परा**[5]।

ध्वन्यालोकस्य लोचनकारः अभिनवगुप्तोऽपि स्पष्टं करोति यत् रस-ध्वनि-औचित्येतानि नित्यकाव्यतत्वानि सन्ति। काव्यस्यात्मा रसोऽस्ति, रसोऽयं ध्वनिरूपेण उन्मीलितो भवत्यतः एव ध्वनेः महत्त्वमस्ति, तथा च औचित्यस्य अस्तित्वं रससत्तायाः एव प्रमाणमस्ति।

आचार्यकुन्तकेन यद्यपि वक्रोक्तिसिद्धान्तस्य निरूपणं कृतं वर्तते तथापि बहुलांशेन तेषां प्रबन्ध-प्रकरण-पद-प्रत्यय-लिङ्ग-स्वभाववक्रतादि क्रमशः प्रबन्धौचित्य-प्रकरणौचित्य-पदौचित्य-प्रत्ययौचित्य-लिङ्गौचित्य-स्वभावौचित्यादि औचित्यस्यैव विविधप्रकाराः[6] सन्ति। रसवादी आचार्यः महिमभट्टोऽपि औचित्यं समर्थयति, तेषामनुसारं रसात्मके काव्ये अनौचित्यस्य संस्पर्शः सम्भवो नास्ति। रसात्मकं च काव्यमिति कुतस्तत्रानौचित्यं संस्पर्श संभाव्यते ।

आनन्दवर्धनात्पूर्ववर्ती समीक्षाशास्त्रे प्रायशः अनौचित्यपरिहारं यावदेव औचित्यस्य स्वरूपो आसीत् , अन्यच्च आनन्दवर्धनपरवर्ती धीमन्तः महिमभट्टादयः रसवादी आचार्याणाम् औचित्यदृष्टि अपि अनौचित्यपरिहारादग्रे न दृष्टवती। तावत् औचित्यस्य व्यापकः विधायकः च आधारः कोऽपि नासीत्। क्षेमेन्द्रः आनन्दवर्धनात् प्रेरणां गृहीत्वा तान् निर्देशकत्वेन स्वीकृत्य अनुसंधानपरकचिन्तनात्परम् औचित्यं स्वतंत्रे विध्यात्मकसिद्धान्तरूपे प्रस्तौति। क्षेमेन्द्रम् औचित्यसिद्धान्तस्य व्यवस्थापकः कथयितुं शक्यते न तु उद्भावकः, ते स्वकीये ग्रन्थे औचित्यविचारचर्चा मध्ये औचित्यं काव्यस्य सर्वातिशायी तत्वरूपेण प्रतिष्ठापयन्ति। क्षेमेन्द्रः अभिनवगुप्तस्य शिष्यः आसीत्। अतः आनन्दवर्धनाचार्येण विवेचितं तथा च अभिनवगुप्तेन व्याख्यातम् औचित्यतत्वं एव क्षेमेन्द्रः स्वतंत्रं व्यवस्थितं च रूपं यच्छति ।

---

[5]ध्वन्यालोकः 3.11

[6]औचित्यविचारचर्चा 8,9,10

Volume – 1, Issue - 8, December-2023
ISSN No: 2583-8792
Impact Factor: 3.179 (SJIF)

**औचित्यस्यार्थः -** क्षेमेन्द्रानुसारं काव्यस्य प्राणभूतं तत्वं रसमस्ति तथा च रससिद्धकाव्यस्य स्थैर्यप्रदायकं तत्वम् औचित्यमस्ति। क्षेमेन्द्रः आनन्दवर्धनादपि स्पष्टतया औचित्यस्य सर्वव्यापकान् मर्मान् उद्घाटयति । ते काव्यस्य सर्वेष्वङ्गोपाङ्गेषु पदवर्णगुणलिङ्गवचनकारकादिषु औचित्यस्थितेः महत्त्वं सूचितवन्तः। तेषामनुसारं यथा -

**उचितं प्राहुराचार्याः सदृशं किल यस्य तत् ।**

**उचितस्य च यो भावः तदौचित्यं प्रचक्षते**[7]॥

यत् किल यस्यानुरूपं तद् उचितमुच्यते, तस्य भावमौचित्यं कथयन्ति। तात्पर्योऽयमस्ति यत् भिन्न-भिन्नवस्तूनां सापेक्षतायां परस्परमनुकूलनमेव औचित्यमस्ति। वस्तुतः औचित्यं काव्ये सौन्दर्यसृष्टेः रहस्यं भवति। विश्वेऽस्मिन् सौन्दर्यस्य कल्पनापि औचित्यैवाश्रितास्ति। एका मनोरमा आकृति एतदर्थमेव हृद्या नास्ति यत् सा गौरवर्णास्ति अथवा पुष्पं केवलं स्ववर्णवैशिष्ट्यादेव आह्लाद्कारको नास्ति अपि तु एतदर्थं चित्तमाकर्षयति यतः तस्य अङ्गप्रत्यङ्गरचना औचित्यपूर्णा तथा च सामरस्ययुक्ता भवति। अङ्गानामुचितानुबन्धनमेव तस्य सौन्दर्यस्याधारोऽस्ति। सौन्दर्यौचित्ययोः अनिवार्यः सम्बन्धोऽस्ति। वस्तुतस्तु औचित्यमेका मर्यादा अस्ति, काये काव्ये वा कस्यापि अङ्गस्य तत्वस्य वा सीम्नः (मर्यादायाः) अधिकं स्वल्पं वा प्रयोगः अनुचितं भवति । काव्यसम्बन्धिनः सर्वे विधिनिषेधाः औचित्याधारे एव निर्मीयन्ते । औचित्यं तादृशी दृष्टिरस्ति या वस्तूनां काव्याङ्गानां वा उचितानुचितप्रयोगस्य परिज्ञानं कारयति । सैवालोचकः सफलो भवति यस्य समीपे औचित्यविवेकोऽस्ति। आचार्यः क्षेमेन्द्रः औचित्यसिद्धान्तस्य प्रेरणां कुतः गृहीतवान् अयमपि विचारणीय विषयोऽस्ति। भरतमुनेः नाट्यशास्त्रस्य श्लोकस्य -

अदेशजो हि वेषस्तु न शोभां जनयिष्यति [8]।

मेखलोरसि बन्धे च हास्य एवोपजायते॥ विस्तृतव्याख्या विषये क्षेमेन्द्रः निम्नश्लोकं स्वीकुर्वन्ति -

कण्ठे मेखलया नितम्बफलके तारेण हारेण वा,
पाणौ नुपूरबन्धनेन चरणे केयूरपाशेन वा।
शौर्येण प्रणते रिपौ करुणतया नायान्ति के हास्यताम् ,
औचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणाः[9]॥

औचित्यशब्दस्य व्युत्पत्तिलभ्यार्थज्ञानाय उचितशब्दस्य विवेचनमावश्यकमस्ति, उच् धातोः (दिवा०,परस्मै०, सकर्मक०, सेट्) क्तान्तप्रत्ययेन वच् परिभाषणे धातोः कितच् प्रत्ययसंयोगेन च उचितशब्दः निष्पद्यते। उचित्शब्दात् ष्यञ् प्रत्यये सति औचित्यशब्दः सिद्ध्यति। आचार्यः कुन्तकः औचित्यम् उचितस्य भावः प्रस्तावोपयोग्यः तथा च दोषदूषकं कथयन्ति - **औचित्यमुचितभावः**

---

[7]औचित्यविचारचर्चा 7
[8]नाट्यशास्त्र 23.69
[9]औचित्यविचारचर्चा 6

**प्रस्तावोपयोग्यदोषदुष्टत्वम्**। स्वग्रन्थे एकस्यां कारिकायां ते औचित्यविषये वदन्ति - औचित्ययुक्तमाद्यादि स्थानशोभि यत् औचित्यवस्तुनः स्वभावोत्कर्षस्तेन समन्वितम्।

आचार्यः क्षेमेन्द्रः स्वग्रन्थे औचित्यविचारचर्चा मध्ये औचित्यस्य सप्तविंशति (27) भेदप्रभेदान् निरूपयति, ते यथा -

पदौचित्य - वाक्यौचित्य - प्रबन्धार्थौचित्य - गुणौचित्य - अलंकारौचित्य - रसौचित्य - क्रियौचित्य - कारकौचित्य - लिङ्गौचित्य - वचनौचित्य - विशेषणौचित्य - उपसर्गौचित्य - निपातौचित्य - कालौचित्य - देशौचित्य – कुलौचित्य - व्रतौचित्य - सत्वौचित्य - अभिप्रायौचित्य - स्वभावौचित्य - प्रतिभौचित्य - अवस्थौचित्य - तत्वौचित्य - विचारौचित्य - नामौचित्य - आशीर्वादौचित्य - सारसंग्रहौचित्य। इतोऽप्यधिकं डा॰ चन्द्रहंसपाठकः नवीनौचित्यप्रकाराः इति शीर्षकयुते स्वग्रन्थे अन्यान् चतुस्त्रिंशत् (34) प्रभेदान् वर्णयति ।

**1. साहित्यिकौचित्यविमर्शः** - रसगुणालंकाराणाम् औचित्यं साहित्यशास्त्रे नितराम् अपेक्षितो वर्तते, तद्यथा -

**(क) रसौचित्यम् - विभावानुभावसञ्चारीभावसंयोगाद्रसनिष्पत्तिः,** रस्यतेति रसः,सवासनानां सभ्यानां रसस्यास्वादनं भवेत्[10]। किं नाम रसौचित्यम् ? प्रकृतरसोपयोगी सहृदयहृदयव्यापी व्यङ्ग्यगर्भाभिहितोद्दीपनविभावोद्दीप्तम् अपूर्वकविवर्णनमेव रसौचित्यं भवति। महाकवेः कालिदासस्य काव्यं रसमयोऽस्ति। यद्यपि कालिदासस्य काव्यं श्रृङ्गाररसप्रधानोऽस्ति तथापि अन्यानां करुण-हास्य-वीर-बीभत्स-भयानकादि रसानामपि अनुभवो भवति। प्रकृतप्रसङ्गे तेषां स्थानानामेव चयनं विश्लेषणं वा अस्ति यानि सहृदयश्लाघ्यानि औचित्यगुणसम्पन्नानि सन्ति।

**श्रृङ्गाररसौचित्यं यथा** - ऋतुसंहारे द्वितीयसर्गे प्रावृड्वर्णने श्रृङ्गाररसौचित्यस्य मनोहारीवर्णनम् अस्ति -

कदम्बसर्जार्जुनकेतकीवनं विकम्पयँस्तत्कुसुमाधिवासितः।
ससीकराम्भोधरसंगशीतलः समीरणः कं न करोति सोत्सुकम्[11]॥

ऋतुसंहारे तृतीयसर्गे शरद्वर्णनेऽपि। अभिज्ञानशाकुन्तलस्य द्वितीयेऽङ्के **अनाघ्रातपुष्पं अनाविद्धरत्नं अनास्वादितरसं अनघरूपम्**[12] इत्यत्र सहृदयश्लाघ्यः श्रृङ्गाररसौचित्यं सुतरामभिव्यज्यते । कुमारसम्भवे तृतीयसर्गे यथा -

हरस्तु किञ्चित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि[13]॥

---

[10]साहित्यदर्पणे धर्मदत्तस्य कथनं
[11]ऋतुसंहारम् 17
[12]अभिज्ञानशाकुन्तलम् 2.11
[13]कुमारसंभवम् 3.68

रघुवंशस्य सप्तमे सर्गेऽपि अज-इन्दुमत्योः परिणयावसरे[14] कविः श्रृङ्गाररसेन सहृदयहृदयमाप्लावितं करोति। कुमारसम्भवे पञ्चमसर्गे पार्वत्याः मनोहारी सौन्दर्यवर्णने[15] महाकवेः श्रृङ्गाररसौचित्यविषयिकी दृष्टेः दर्शनं भवति। मालविकाग्निमित्रे चतुर्थेऽङ्के कामपीडिताग्निमित्रस्य मालविकालिङ्गनाय प्रयासः[16], उभयोः प्रेमालापः श्रृङ्गाररसौचित्यं प्रकटयति। मेघदूत् यक्षः स्वप्रियायाः सादृश्यं प्रकृतेः विभिन्नोपादानेषु पश्यति कदाचित् **श्यामललतासु , चकितहरिणीप्रेक्षणे, नदीवीचिषु भ्रूविलासान्**[17] उत्पश्यति परं सादृश्यं न प्राप्नोति , तदा सः शिलायां धातुरागैः प्रणयकुपितां स्वप्रियामालिख्य तस्याः अभिनन्दनं कर्तुमिच्छति तर्हि तस्य दृष्टिः अश्रुपूर्णा भवति , यस्मात्तत्रापि तयोः मेलनं न भवति। अत्र सद्दयदृदयावर्जकः विप्रलम्भश्रृङ्गाररसौचित्यं स्पष्टतया व्यज्यते। रघुवंशस्य चतुर्दशे सर्गे यदा रामः कृशाङ्गयष्टिं सीतां स्वाङ्के गृहीत्वा रमणाभिलाषं[18] पृच्छति , तत्र श्रृङ्गाररसौचित्यं हृद्यमस्ति। एवमेव नवदशे सर्गेऽपि। कुमारसम्भवाष्टमे सर्गेऽपि श्रृङ्गाररसौचित्यं चरमोत्कर्षेऽस्ति।

**करुणरसौचित्यं यथा -** कुमारसम्भवस्य चतुर्थे सर्गे त्रिनेत्रधारी शिवः कामदेवं भस्मीभूतं करोति तदा रतिः कामसखा वसन्तं पश्यति तर्हि सा स्वकीयं दुःखावेगं निरोद्धुं न शक्नोति तथा च स्वदयितं स्मरन् मुक्तकण्ठेन विलापं करोति, भूमौ लुठति[19] तर्ह्यत्र इष्टनाशादिजन्यःशोकस्थायीभावः सहृदयावर्जकत्वात् करुणरसौचित्यं प्रकटयति।

रघुवंशस्य अष्टमसर्गे अजविलापप्रसङ्गेऽपि[20] करुणरसौचित्यस्य परिपाकः दृग्गोचरो भवति। सः इंदुमतीं विना स्वकीयं जीवनं निष्फलं व्यर्थं च जानाति, दुःखाधिक्यं चानुभवति, स्वकीयं दुःखाक्रोशं **कथं न मां दहेः** इत्थं प्रकटयति । चतुर्दशसर्गेऽपि गर्भभारभराक्रान्तासीतायाः कुररीसदृशं उन्मुक्तकण्ठरोदनं[21] कस्य सचेतसः चेतः नावर्जयति।

**हास्यरसौचित्यं यथा -** मालविकाग्निमित्रे द्वितीयाङ्के यदा विदूषकः मालविकां अग्निमित्रस्य कङ्कणं पुरस्कारस्वरूपं यच्छति तदा देवी धारिणी साश्चर्येण पृच्छति -

**देवी - तिष्ठ तावत् । गुणान्तरमजानन् किन्निमित्तं त्वमाभरणं ददासि ?**

**विदूषकः - परकीयमिति कृत्वा।**

---

[14]रघुवंशम् 7.22
[15]कुमार॰ 5.24
[16]मालविकाग्निमित्रम् 4.12
[17]मेघदूतम् 2.43
[18]रघु॰14.27
[19]कुमार॰ 45,46
[20]रघु॰ 8.43
[21]रघु॰ 14.68

एवमेव पञ्चमेऽङ्केऽपि **विदूषकः - भवति एषः लोकव्यापारः। सर्वो नववरो लज्जातुरो भवति**[22]। एवं बहूनि स्थलानि सन्ति यत्र हास्यौचित्यं परिलक्षितो भवति।

**वीररसौचित्यं यथा** - कालिदासस्य काव्यानुशीलनेन वीररस्स्यापि दर्शनं भवति परं तत्र ओजगुणविशिष्टस्य उत्साहभावस्य प्रज्वलनशीलता नास्ति। कालिदासस्य वीररसोऽपि सुकोमलसुकुमारभावनया उपेतोऽस्ति। यथा -

मेघदूते मेघः दानवीरस्य प्रतिनिधित्वं करोति, सः **संतप्तानां शरमस्ति**[23], **जातकानां तृषाहरोऽस्ति, वंध्यात्वस्य अपहर्ता** अस्ति, एतेषु वर्णनेषु दयावीररसौचित्यस्य दृष्टिपातो भवति। कुमारसम्भवे शंकरे दयावीरस्य अप्रतिमं निदर्शनं भवति। तृतीयसर्गे **पर्यंकबन्धस्थिरपूर्वकाय**[24], **विरतप्रसंगः, नेत्रैरविस्पन्दितपक्ष्ममालः**[25], **नवद्वारनिषिद्धवृत्ती**[26]**त्यादिषु** श्लोकेषु धर्मवीराख्यरसौचित्यस्य सुतरां निदर्शनं भवति। अभिज्ञानशाकुन्तलस्य षष्ठेऽङ्के युद्धवीररसौचित्यस्य दर्शनं भवति यदा प्रियतमा विरहितं दुष्यन्तं दृष्ट्वा इन्द्रसारथिमातलिः क्रोधोद्दीपनाय विदूषकस्य कण्ठं गृह्णाति, यथा - **मदीयं शस्त्रं त्वां द्रक्ष्यति**[27]। रघुवंशस्य नवमे सर्गे मृगयाविहारी दशरथः भयाक्रान्ता हरिणेः सजलां दयायाचनायुतां दृष्टिं दृष्ट्वा तस्यै प्राणदानम्[28] इत्यत्र दयावीराख्यरसौचित्यस्य दर्शनं भवति। इतोऽप्यन्ये रसौचित्याः प्राप्नुवन्ति यथा - बीभत्स-भयानकाद्भुतशान्तवात्सल्यादयः।

**(ख) गुणौचित्यम् - ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः। उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥**[29]

**काव्यशोभाकर्तारो धर्माः गुणाः**[30]। अभिव्यक्तमनःस्थितेरनुकूलवर्णसंघटना एव गुणौचित्यमस्ति। औचित्यविचार- चर्चायामाचार्यः क्षेमेन्द्रः कथयति यत् औचित्यपरिपूर्णत्वादेव गुणाः गुणत्वमर्थात् उत्कर्षाधानस्य हेतुत्वं प्राप्नुवन्ति। औचित्यादच्युता नित्यं भवन्त्येव गुणा गुणाः। तेषां तात्पर्योऽयम् अस्ति यत् प्रकृतार्थानुरूपः माधुर्यादिगुणानाम् अभिव्यञ्जकवर्णानुकूलसंघटितपदावल्यायुक्तः सहृदयहृदयानन्दप्रवाहवाहकः वाक्यः गुणौचित्यमस्ति।

**माधुर्यगुणौचित्यम्** - मालविकाग्निमित्रस्य चतुर्थाङ्के यदा अग्निमित्रः बकुलवालिकाविदूषकयोः सहयोगेन मालविकां निवेदयति - **विसृज सुन्दरि सङ्गमसाध्वसं मयि चिरात् प्रभृति प्रणयोन्मुखे**[31]। अत्र वर्गान्त्यगाः वर्णाः अल्पवृत्तिश्च संयोगश्रृङ्गारयुतं माधुर्यगुणौचित्यं व्यञ्जयति। अभिज्ञानशाकुन्तले तृतीयेऽङ्के यदा दुष्यन्तः

[22]माल०मि० 5
[23]मेघदूतम् 1.7
[24]कुमार० 68
[25]कुमार० 69
[26]कुमार० 70
[27]अभि० शा० 6.72
[28]अभि० शा० 9.57
[29]काव्यप्रकाशः 8.1
[30]काव्यालङ्कारसूत्राणि 3.12
[31]माल०मि० 4.13

शकुन्तलां प्रति स्नेहेन पश्यति तथा च स्वकीयमभिलाषं सूचयति तदा प्रियंवदा तं प्रजागरकृशः[32] कथयति। एवमेव **निशि-निशि, विवर्णमणिकृतम् , अनतिलुलितकनकवलय**[33] आदिपदेषु प्रयुक्तनकारशकारपकारलकारप्रभृतिभिः वर्णैः विप्रलम्भश्रृङ्गारान्तर्गतमाधुर्यगुणस्य औचित्यस्य पुष्टिः सततं भवति।

एवं कुमारसम्भवे रतिविलापप्रसङ्गे **अवगम्य बहुलेऽपि वपुः दुःखमनङ्गम्**[34], **हरितारुणचारुबन्धनः, कलपुंसकोकिलशब्दसूचितः**[35], **मदनेन विनाकृता रतिः**[36], **किल मे वचनीयमिदं रमणमा**दिपदेषु करुणरसयुतं माधुर्यगुणौचित्यं वर्तते। अभिज्ञानशाकुन्तलस्य प्रथमाऽङ्के राजा दुष्यन्तस्य कण्वाश्रमागमनानन्तरं तत्रत्यं पुण्यप्रभवं दृश्यं पश्यति तत्र शान्तरसस्याविर्भावो भवति। तत्र **शुकगर्भककोटरमुखभ्रष्टाः नीवाराः, प्रस्निग्धा क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः**[37], **अभिन्नगतयः सहन्ते मृगाः** प्रभृतिशब्देषु वर्गान्त्यवर्णानां प्रयोगः शान्तरसानुकूलं माधुर्यगुणं प्रकटयति।

**ओजगुणौचित्यम्** - विक्रमोर्वशीयनाटके प्रथमाऽङ्के राजा चित्ररथवार्तालापप्रसङ्गे[38] नृपस्य कथने वीररसस्योत्पत्तिरस्ति, तत्र प्रयुक्तवर्णेषु रेफटवर्णषकाराभ्यां वीररसानुकूलस्य ओजगुणस्यापि दर्शनं भवति। रघुवंशमहाकाव्यस्य तृतीयसर्गे तुमुलयुद्धवर्णनप्रसङ्गे[39] रौद्ररसस्यावतारणास्ति, अत्र रौद्ररसानुकूलसंयुक्तवर्णानां वर्गस्य तृतीयवर्णानां षकारादेः च प्रयोगेण ओजगुणस्य सन्निधानमस्ति। रघुवंशस्य सप्तमे सर्गे पञ्चाशततमे श्लोके बीभत्सरसः व्यञ्जितोऽस्ति, तदनुकूलसंयुक्तवर्णाः षकाररेफभकारक्षकारादिवर्णप्रयोगः ओजगुणविशिष्टमौचित्यं प्रदर्शयति।

**प्रसादगुणौचित्यम्** - अभिज्ञानशाकुन्तलस्य चतुर्थाङ्के शकुन्तलायाः पतिगृहगमनकाले महर्षिकण्वः तामुपदिशति यत् **शुश्रूषस्व गुरून् कुरु प्रियसखी**[40] श्लोकेऽस्मिन् महर्षेः उपदेशोऽयं शुष्केन्धनाग्निवत् पाठकानां श्रोतानां च मनसि व्याप्तो भवत्यत एवात्र प्रसादगुणौचित्यमस्ति। ऋतुसंहारस्य प्रथमसर्गे प्रसादगुणौचित्यं, यथा - **सुतन्त्रिगीतं मदनस्य दीपनं शुचौ निशीथेऽनुभवन्ति कामिने**[41]त्यत्र। एवं महाकवेः कालिदासस्य कृतीनां गुणौचित्यदृष्ट्या परिशीलनोपरान्तविदितो भवति यत् तासु माधुर्यप्रसादगुणयोः औचित्यं बाहुल्येन वर्तते।

---

[32]अभि०शा० 3
[33]अभि०शा० 3.10
[34]रघु० 4.13
[35]रघु० 4.14
[36]रघु० 4.21
[37]अभि०शा० 1.14
[38]विक्रमोर्वशीयम् 1.17
[39]रघु० 3.57
[40]अभि०शा० 4.18
[41]ऋतु० 1.3

**(ग) अलङ्कारौचित्यम् - उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्। हारादिवदलङ्काराः तेऽनुप्रासोपमादयः**[42]**।।** अलङ्क्रियतेऽनेनिति अलङ्कारः। मालविकाग्निमित्रे तृतीयाङ्के परिमिताभरणायाः मालविकायाः आनन्दस्योपमा कुंदलतायाः शरकाण्डपाण्डुत्वप्राप्त्या[43] सह कृत्वा पूर्णोपमालङ्कारस्य व्याजेन राजाग्निमित्रं लक्षितं कृत्वा प्रणयानलविदग्धायाः मालविकायाः कृशशरीरसौन्दर्यस्यापकर्षात् दीनतायाः व्यञ्जना प्रदर्शितास्ति। अतेवात्र उपमालङ्कारौचित्यमस्ति। विक्रमोर्वशीये द्वितीयेऽङ्के उर्वशीचन्द्रलेखयोः वार्तालापप्रसङ्गे चित्रलेखा यदा उर्वशीं कौमुदी तथा पुरुवसः चन्द्रेण साधर्म्यं करोति **प्रथमोदित इव चन्द्रमा**[44] तर्हि तत्रापि उपमालङ्कारौचित्यं विद्यते। एवमन्यान्यपि बहूनि उदाहरणानि सन्ति। रघुवंशस्य प्रथमे श्लोके **वागर्थाविवे**[45]त्यत्र, शाकुन्तले चतुर्थेऽङ्के **कथा प्रमत्तः प्रथमं कृतामिव**[46]**,** अग्रेऽपि **अग्निगर्भा शमीमिव**[47]**,** पञ्चमेऽङ्के **हुतवहपरीतं गृहमिव**[48]**,** एवं स्थाने स्थाने उपमाया औचित्यम् उपमा कालिदासस्येति सूक्तिं समर्थयति।

उत्प्रेक्षालंकारोऽपि कालिदासस्य विदग्धतायाः परिचायकोऽस्ति। मेघदूतस्य पूर्वार्धे विशीर्णरिवा नद्याः[49] वर्णनेन संभोगातुरकामिन्याः प्रियतमचरणनिपातं तत्प्रसादनत्वं च व्यञ्ज्यते। कुमारसंभवे प्रथमसर्गे उत्प्रेक्षा प्रयोगः यथा **- हिमालयो नाम नगाधिराजः पूर्वापरो तोयनिधिवगाह्य पृथिव्याः मानदण्ड इव स्थितः**[50]**,** अग्रेऽपि यौवनं कामस्य सोपानमिव कथयन् उत्प्रेक्षाया औचित्यं परिलक्ष्यते। मालविकाग्निमित्रे प्रथमेऽङ्के **प्रत्युपदिशतीव मे बाला**[51]**,** पञ्चमेऽङ्के **तवधृतहस्तकमलया नरेन्द्रलक्ष्म्या वसुमतीव**[52] अत्र विदूषककथनेन अग्निमित्रस्य हृदये मालविकया सह पाणिग्रहणाभिलाषः व्यञ्ज्यते। शाकुन्तले प्रथमाङ्कस्य षष्ठे श्लोके **पश्यामीव पिनाकिनम्** , द्वितीयाङ्कस्य तृतीये श्लोके **कृत इव मुग्ध विलोकितोपदेशः** अत्रापि उत्प्रेक्षालंकारस्यौचित्यं परिलक्ष्यते।

रूपकालङ्कारौचित्यं यथा शाकुन्तले तृतीयेऽङ्के **विदूषकः - तेन हि गृहीतपाथेयः कृतोऽसि तथा । कृतं त्वयोपवनं तपोवनमिति पश्यामि**[53]**,** अत्र विदूषकप्रयुक्तपाथेयपदेन दुष्यन्तोपरि प्रेमपथिकत्वस्यारोपणम्। चतुर्थेऽङ्के **शकुन्तला (स्मृत्वा)**

---

[42]काव्यप्रकाशः 8
[43]माल०मि० 3.8
[44]विक्रमो० 2
[45]रघु० 1.1
[46]अभि० शा० 4.1
[47]अभि० शा० 4.4
[48]अभि० शा० 5.101
[49]मेघदूतम् 1.19
[50]कुमार० 1.1
[51]माल०वि० 1.5
[52]माल०वि० 5.6
[53]अभि० शा० 2

**- तात् ! लताभगिनीं वनज्योत्स्नां तावत् आमन्त्रयिष्ये**[54]**,** अत्र वनज्योत्स्ना लतायां भगिनीत्वस्यारोपः। पञ्चमेऽङ्के **शकुन्तला - सख्यौ ! एषः वातैरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षः**[55]**,** अत्र पल्लवेषु अङ्गुलीत्वारोपः, केसरे बालत्वारोपः। एवं सहृदयहृदयाहारित्वात् रूपकालंकारस्यौचित्यं स्पष्टतया दृश्यते। एवमेव बहुषु स्थानेषु निदर्शनायाः काव्यलिङ्गस्य समासोक्तेः विराधाभासस्य व्यतिरेकस्य अप्रस्तुतप्रशंसायाः अर्थान्तरन्यासस्य औचित्युक्तः प्रयोगः कालिदासकृतिषु दर्शनीयोऽस्ति।

**2. भाषागतौचित्यम्** (पदवाक्यप्रबन्धार्थकक्रियाकारकलिङ्गवचनविशेषणोपसर्गनिपातयुक्तम्) **-** प्रकृतस्य अर्थस्य अवयवरूपे शोभावर्धक-चमत्कारजन्य-सहृदयावर्जकवर्णसमूहानां संज्ञा एव पदौचित्यमस्ति। कवेः काव्यं पदे पदे पदौचित्येन मण्डितोऽस्ति। ऋतुसंहारप्रथमसर्गे प्रयुक्तेन **कामिनिभिः**[56] पदेन अभिप्रायः सामान्या नारी नास्त्यपितु कामसुखप्रदायिनी रमणीया रमणी अस्ति। मेघदूते यक्षाय **राजराजस्य अनुचरः**[57] राजराजेति पदेन अत्र भोगविलासैश्वर्यादि सुखस्यातिशयिता तथा च तज्जन्य विरहदुःखाधिक्यः व्यञ्जितो भवति। **जीमूतेन**[58] इति पदमपि साभिप्रायोऽस्ति, जीवनमुयते बद्ध्यतेऽनेनेति जीमूत इति निरुक्त्या जीमूतस्य प्राणसंधारणक्षमताया अभिव्यक्तिर्भवति।

**वर्णसमुदायः पदम् , तत्समुदायो वाक्यम्**[59]। **वाक्यं स्यादाकांक्षायोग्यतासत्तियुक्तः पदोच्चयः**[60]। क्षेमेन्द्रानुसारं वाक्यौचित्यस्य स्थितिः तत्र भवति यत्र वाक्ये प्रयुक्तानि सर्वाण्यपि पदानि रसानुकूलार्थाभिव्यञ्जनां कारयितुम् अहमहमिकया परस्परं स्पर्धां कर्तुं समर्थानि भवन्ति , येन वाक्यार्थः प्राणयुतं भवतीदमेव वाक्यौचित्यस्य लक्षणमस्ति, एवं सति वाक्यार्थः चेतन इव प्रतिभाति। ऋतुसंहारे ग्रीष्मवर्णने **असह्यवातोद्धरेणुमण्डला प्रचण्डसूर्यातपतापिता**[61]**, विशुष्ककण्ठोद्गतसीकराम्भसी गभस्तिभिर्भानुमतोऽनुतापिता**[62]**, प्रवृद्धतृष्णोपहता**दिवाक्येषु वृत्तिबहुला ओजगुणयुतायाः पदावल्याः प्रयोगः। मेघदूते **वीचिक्षोभस्तनितविहगश्रेणीकाञ्चीगुणायाः**[63]**, श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी**[64]**,** कुमारसंभवे तृतीये सर्गे **विशदाधराणामापाण्डुरीभूतमुखच्छवीनां स्थाणु वनौकसस्तामाकालिकीं पर्यंकबन्धस्थिरपूर्वकाय**[65] इत्यादिषु

[54]अभि॰ शा॰ 4
[55]अभि॰ शा॰ 4
[56]ऋतु॰ 1.28
[57]मेघ॰ 1.3
[58]मेघ॰ 1.4
[59]ध्वन्यालोकलोचनः पृ-33
[60]सा॰ द॰ पृ-24
[61]ऋतु॰ 1.10
[62]ऋतु॰ 1.15
[63]मेघ॰ 1.28
[64]मेघ॰ 2.20
[65]कुमार॰ 3.33

ओजगुणविशिष्टा, पञ्चमे सर्गे **तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती**[66] प्रसादमधुरा पदावल्या निर्मितेषु वाक्येषु वाक्यौचित्यं दृश्यते। रघुवंशे यथा **मन्दः कविः यशः प्रार्थी गमिष्याम्युपहास्यताम्**[67] **, प्रजानां विनयाधानाद् रक्षणाद् भरणादप्य**[68]त्र प्रसादगुणोपेता पदावली दृश्यते।

संघटितः वाक्यसमुदायः प्रबन्धः। आचार्यः नारायणमिश्रानुसारं प्रबन्धः महाकाव्यं काव्यं वा । कालिदासकाव्येषु यत्र-तत्र प्रबन्धौचित्यस्य दर्शनं भवति । यथा रघुवंशे **मन्दः कविः** श्लोकेऽस्मिन् सूर्यवंशस्य महत्त्वं तथा च स्वकीयाल्पमतेः लघुतायाः वैषम्यं प्रदर्शयन् प्रतिपाद्यविषयस्य वैशिष्ट्यं गुणोपेतत्वं च सविनयं निवेदयति । क्रियौचित्यं यथा कुमारसंभवे तृतीयसर्गे पपौ क्रियया कृष्णसारः स्वप्रियां सतृष्णं पश्यति तथापि तस्य अतृप्तेः भावं नेत्रपानकर्मणा महाकवेरभिव्यक्ति सराहनीया वर्तते , एवमन्यत्रापि। क्षेमेन्द्रानुसारम् आह्लादितशयजनकापूर्वशोभाविधायकः सहृदया- वर्जकौचित्यमण्डितक्रियापदेन सदन्वितः क्रियासमूहः कारकौचित्यसंज्ञया वक्तुं शक्यते। यथा रघुवंशे **रघूणाम्**[69] इति षष्ठयन्तबहुवचनान्तपदेन न तु येषां केषां महत्त्वहीननृपाणाम् अपितु नृपेषु गौरवभूतानां रघूणाम् इत्याशयोऽस्ति कवेः । मेघदूते उत्तरार्धे **कातरेण**[70] **चेतसा स्मरामि** अत्र चित्तस्य करणकारकप्रयोगः श्लाघनीयोऽस्ति ।

किन्नाम लिङ्गम् ? **भावतत्वदृशः शिष्टाः शब्दार्थेषु व्यवस्थिताः । यद् धर्मे अङ्गतामेति लिङ्गं तत्तत्प्रचक्षते**[71] ॥ प्रकृतार्थानुरूपं सहृदयाहारिलिङ्गसंसूचकं पदं लिङ्गौचित्यमिति कथ्यते। ऋतुसंहारे प्रथमेऽङ्के **प्रचण्डः सूर्यः, निदाघकाले**[72]त्यत्र पुंस्त्वबोधकानि पुल्लिंगपदानि तथा च रघुवंशे महर्षिवशिष्ठकृते **हविर्भुक्पदम्** अरुन्धतेः कृते **स्वाहा**[73] पदप्रयोगः लिङ्गौचित्यं दर्शयति । वचनौचित्यं यथा **जगतः पितरौ वन्दे पार्वती परमेश्वरौ**[74]**,** मेघदूते नीत्वा **मासान् कतिचिदबला विप्रयोगः स कामी**[75] अत्र मासानिति पदेन वियोगदुःखावधेः दीर्घत्वं व्यञ्ज्यते । ऋतुसंहारे तृतीयेऽङ्के **चन्द्रो दहत्यतितरां तनुमङ्गनानामि**[76]त्यत्र चन्द्र एकाकिन एव वियोगसंतप्तजनान् दग्धं करोति।

---

[66]कुमार० 5.1
[67]रघु० 1.3
[68]रघु० 1.22
[69]रघु० 1.9
[70]मेघ० 2.15
[71]वाक्यपदीयम्, भर्तृहरिः
[72]ऋतु० 1.1
[73]रघु० 1.56
[74]रघु० 1.1
[75]मेघ० 2.1
[76]ऋतु० 3.9

किन्नाम विशेषणम् ? **स्वमहिम्ना विधीयन्ते येन लोकोत्तरश्रियः । रसस्वभावालङ्कारस्तद्विधेयं विशेषणम्**[77] ॥ क्षेमेन्द्रानुसारं सम्यक्तया उचितोत्कर्षाधायकं सहृदयहृदयनिवृत्तिप्रदायकं प्रकृतार्थपोषकं विशेषणयुक्तं पदमेव विशेषणौचित्यं भवति। ऋतुसंहारे तृतीयेऽङ्के **विकचकमलनेत्रा फुल्लनीलोत्पलाक्षी**[78] एतानि पदानि शरत्कालीनशोभां प्रत्यक्षमिव कुर्वन्ति। एवमेव रघुवंशे **क्व सूर्यप्रभवो वंशे**[79]त्यत्र सूर्यप्रभवमिति पदं रघुकुलस्य तेजोत्कर्षं प्रख्यापयति। शाकुन्तले शकुन्तलायाः सौन्दर्यवर्णनाय कृते **अनाघ्रातम् अलूनम् अनाविद्धम् अनास्वादितरसम् अखण्डमि**त्यादिभिः पदैः विशेषणौचित्यस्य अविरतं निदर्शनं भवति। उपसर्गौचित्यं यथा मेघदूते **कतिचिदबलाविप्रयुक्ते**त्यत्र वि-प्रोपसर्गाभ्यां विरहिणः यक्षस्य वियोगप्राबल्यं दृश्यते। कुमारसंभवे प्रथमसर्गे **विप्रेक्षितम्**[80] इति पदे प्रयुक्ता उपसर्गाः पार्वतेः अक्षिप्रेक्षणसौन्दर्यातिशयतां दृष्टेः चाञ्चल्यं स्निग्धतां विभ्रमविलासोपेतताम् च अभिव्यञ्जयन्ति इत्युपसर्गौचित्यमस्ति। निपातौचित्यं यथा ऋतुसंहारे षष्ठे सर्गे **चित्तं मुनेरपि हरन्ति निवृत्तरागम्**[81] अत्र अपि पदं वसन्तकाले कामप्रकर्षं सुतरां प्रकटयति। एवमेव मेघदूतपूर्वार्धे **मेघालोके भवति सुखिनोऽप्यन्यथा वृत्तिचेत**[82] अत्र अपि पदं वर्षाकाले प्रिया- विरहवियोगस्य विशिष्टार्थं समुचितरूपेण दर्शयति।

एवमन्यान्यपि औचित्यानि भवन्ति यथा सामाजिकौचित्यविमर्शे देश-काल-स्वभाव-कुल-व्रत-नामौचित्यानि तथा तात्विकौचित्यविमर्शे तत्त्व-सत्त्व-अभिप्राय-सारसंग्रह-प्रतिभा-अवस्था-विचार-आशीर्वचनौचित्यानि आदीनि।

## सन्दर्भग्रन्थसूची -

I. अभिज्ञानशाकुन्तल (राघवभट्टीकोपेतम्) कालिदास, सम्पादन - एम०आर०काले, प्रकाशन - गोपालनारायणः मुम्बई ।

II. अभिज्ञानशाकुन्तल - कालिदास, सं - ए०बी० गजेन्द्र गडकर, प्रका० - द पापुलर बुक स्टोर सूरत (पञ्चमसंस्करण) ।

III. अभिज्ञानशाकुन्तल (किशोरकेलिटीकोपेतम्) कालिदास, हरिदास संस्कृतसीरिज - 41, चौखम्बा ओरियन्टलिया वाराणसी, वि०संवत् - 1992/1935।

IV. अभिज्ञानशाकुन्तल (अर्थद्योतनिकोपेतम्) कालिदास, संशोधित – नारायणराम आचार्य, काव्यतीर्थनिर्णयसागर प्रेस मुम्बई 1880/1958।

[77]वक्रो० जी० 2.15
[78]ऋतु० 3.28
[79]रघु० 1.2
[80]कुमार० 1.46
[81]ऋतु० 6.25
[82]मेघ० 1.3

V. औचित्यविचारचर्चा - क्षेमेन्द्र, गोकुलदास संस्कृतग्रन्थमाला - 44, व्या॰ - श्रीनारायणमिश्र, चौखम्बा ओरिन्टलिया वाराणसी, दिल्ली, 1982।

VI. औचित्यविमर्श - डा॰ राममूर्ति त्रिपाठी, प्रका॰ - भारतीभण्डार रीडरप्रेस इलाहाबाद, 1964।

VII. औचित्यसम्प्रदाय का हिन्दी काव्यशास्त्र पर प्रभाव - डा॰ चन्द्रहंस पाठक, चौखम्बा विद्या भवन वाराणसी 1967।

VIII. कालिदासग्रन्थावली - डा॰ रेवाप्रसादद्विवेदी, काशी हिन्दू विश्वविद्यालय वाराणसी 1976।

IX. कालिदासग्रन्थावली - डा॰ सीताराम चतुर्वेदी, भारतप्रकाशनमन्दिर अलीगढ 2019।

X. कालिदास - डा॰ आर॰डी॰ करमकर, कर्नाटक यूनिवर्सिटी धारवाड 1960।

XI. कालिदास - सी॰ कुहन राजा, आन्ध्र यूनिवर्सिटी वाल्टेयर 1956।

XII. कालिदास - पं॰ चन्द्रवली पाण्डेय, मोतीलाल बनारसीदास 2011/1954।

XIII. कालिदास अ क्रिटिकल स्टडी - डा॰ अमलधारी सिंह, भारतीय विद्याप्रकाशन वाराणसी 1976।

XIV. कालिदास साहित्य - डा॰ आद्याप्रसादमिश्र, महेशठक्कुरसंस्कृतग्रंथमालापुष्प - 2, डा॰ उमेशमिश्र, दरभंगा संस्कृतविश्वविद्यालय 1962।

XV. कालिदास बिब्लियोग्राफी-डा॰ सत्यपाल नारंग, हेरिटेज पब्लिशर्स कनाट सर्कस नई दिल्ली 1976 (प्रथम संस्करण)

XVI. कालिदास की लालित्य योजना - डा॰ हजारी प्रसाद द्विवेदी, राजकमल प्रकाशन लि॰ 8 फेज बाजार दिल्ली, 1970

XVII. कुमारसंभव (संजीवनी) (1-7सर्ग) कालिदास, वासुदेव लक्ष्मण पणशीकर बम्बई, 1930।

XVIII. कुमारसंभव - कालिदास, (8-17 सर्ग) सीताराम सहगल वाल्मीकि प्रेस कलकत्ता।

XIX. काव्यालंकार - रुद्रट, संपा॰ - रामदेव शुक्ल, चौखम्बा विद्याभवन वाराणसी, 1966।

XX. काव्यालंकारसूत्रवृत्ति - वामन, संपा॰ - पं॰ केदारनाथ शर्मा, चौखम्बा अमरभारती प्रकाशन वाराणसी, 1979।

XXI. ध्वन्यालोक - आनन्दवर्धन, संपा॰ - जगन्नाथपाठक, चौखम्बा विद्याभवन वाराणसी, 1982।

XXII. मेघदूत (संजीवनी टीकोपेतम्) कालिदास, संपा॰ - जतीन्द्र विमल चौधरी, प्राच्य वाणी मन्दिर कलकत्ता।

XXIII. मेघदूतः एक विश्लेषण - डा॰ देवीदत्त शर्मा, देववाणी परिषद् दिल्ली, 1981।

XXIV. मालविकाग्निमित्र- कालिदास, संपा॰ - सी॰ आर॰ देवधर, मोतीलाल बनारसीदास दिल्ली, 1966।

XXV. विक्रमोर्वशीय (टीकात्रयोपेता) कालिदास, द संस्कृत अकादमी उस्मानिया यूनिवर्सिटी हैदराबाद, 1966।

XXVI. साहित्यशास्त्र - डा॰ रामकुमारवर्मा, लोकभारती प्रकाशन, 1968।

XXVII. क्षेमेन्द्र स्टडीज - डा॰ सूर्यकान्त शास्त्री, ओरियन्टल बुक एजेन्सी पूना, 1954।

XXVIII. क्षेमेन्द्र - डा॰ ब्रजमोहन चतुर्वेदी, साहित्य अकादमी दिल्ली, 1983।

XXIX. विश्वकविः कालिदास एक अध्ययन - पं॰ सूर्यनारायण व्यास, ज्ञानमण्डल प्रकाशन ग्वालियर (इन्दौर), 1957।

XXX. रघुवंश महाकाव्य (संजीवनी सान्वय हरिप्रिया हिन्दीव्याख्योपेतम्, कालिदास, कृष्णदाससंस्कृतसीरिज - 44, पं० रामचन्द्र झा, पं० लक्ष्मी प्रपन्नाचार्य, कृष्णदास अकादमी वाराणसी, 1983।